स्पशः, पुं, (स्पशतीति । स्पश + पचाद्यच् ।) चरः । (यथा, महाभारते । १ । १४७ । २५ ।
"वयन्तु यदि दाहस्य बिभ्यतः पद्रवेमहि ।
स्पशैर्नो घातयेत् सर्व्वान् राज्यलुब्धः सुयोधनः ॥")
अभिसरः । इत्यमरः । ३ । ३ । २१३ ॥ चरो गूढ़पुरुषः । अभिसरो युद्धम् । प्राणनिरपेक्षो यो द्रव्यार्थं व्याडं हस्तिनं वा योधयति सोऽभिसरः । इत्येके । इमौ द्वौ स्पशौ । इति भरतः ॥

स्पष्टं, त्रि, स्पश्यते स्मेति । स्पश + णिच् + क्तः । "वा दान्तशान्तेति ।" ७ । २ । २७ । इति साधुः ।) व्यक्तम् । तत्पर्य्यायः । स्फुटम् २ प्रव्यक्तम् ३ उल्वणम् ४ । इत्यमरः ।७।१।८१ ॥ उद्रिक्तम् ५ प्रकटम् ६ । इति जटाधरः ॥ (यथा, श्रीमद्भागवते । ४ । १५ । २२ ।
"भोः सूत हे मागध सौम्य वन्दिन्
लोकेऽधुना स्पष्टगुणस्य मे स्यात् ।
किमाश्रयो मे स्तव एष योज्यतां
मा मय्यभूवन् वितथा गिरो वः ॥")

स्पष्टीकृतं, त्रि, व्यक्तीकृतम् । कृधातौ परे स्पष्टशब्दादभूततद्भावे च्विप्रत्ययेन निष्पन्नम् ॥

स्पृ, न प्रीतिरक्षापालने । इति कविकल्पद्रुमः ॥ (स्वा०-पर०-सक०-सेट् ।) न, स्पृणोति । इति दुर्गादासः ॥

स्पृक्का, स्त्री, पृक्का । स्पृश्यते सौगन्ध्यात् स्पृश संस्पर्शे बाहुल्यात् कः पृषोदरादित्वात् शस्य कः स्पृक्का दन्त्यादिरिति केचित् । इत्यमरटीकायां भरतः । २।४।१२२ ॥ (यथा, बृहत्संहितायाम् । ७७।५ ।
"त्वक्कुष्ठरेणुनलिका-
स्पृक्कारसतगरवालकैस्तुल्यैः ।
केसरपत्रविमिश्रै-
र्नरपतियोग्यं शिरःस्नानम् ॥")

स्पृश, श औ स्पर्शे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-अनिट् ।) श, स्पृशति । औ, अस्प्राक्षीत् अस्पृक्षत् । हस्तेन पस्पर्श तदङ्गमिन्द्रः । इति कुमारः । इति दुर्गादासः ॥

स्पृशा, स्त्री, (स्पृशतीति । स्पृश + कः । टाप् ।) भुजङ्गघातिनीवृक्षः । कङ्कालिका इति ख्याता । इति शब्दचन्द्रिका ॥

स्पृशी, स्त्री, कण्टकारी । इत्यमरः । २।४।९३ ॥

स्पृष्टः, त्रि, (स्पृश + क्तः ।) कृतस्पर्शः । यथा, प्रायश्चित्ततत्त्वधृतब्रह्मपुराणवचनम् ।
"उच्छिष्टेन तु शूद्रेण विप्रः स्पृष्टस्तु तादृशः ।
उपवासेन शुद्धिः स्यात् शुना संस्पृष्ट एव वा ॥"

स्पृष्टास्पृष्टं, क्ली, (स्पृष्टेन आ सम्यक् स्पृष्टम् ।) परस्परस्पर्शनम् । यथा,—
"अथ जातिगुणान् वक्ष्ये स्पृष्टास्पृष्टं महेश्वरि ! ।
अधमैः शिष्टसंस्पर्शे प्रायश्चित्तं यथाविधि ॥
ब्राह्मणस्य शवाङ्गञ्च क्षत्रियाद्यैः कदाचन ।
स्पृष्ट्वाचम्य हरिं स्मृत्वा उपवासेन क्षत्रियः ॥
व्रतस्थशूद्रस्पर्शेऽपि हरिसंस्मरणे शुचिः ।
सेवयोपस्पृशेद् यस्तु प्रायश्चित्तं न विद्यते ॥
ब्राह्मणो यस्तु शूद्रस्य सेवयोपस्पृशेत् क्वचित् ।
स्नात्वाचम्य हरिं स्मृत्वा प्राणायामेन शुध्यति ॥
शूद्रस्तु त्रिविधो ज्ञेयो व्रतस्थश्चोत्तमः स्मृतः ।
कायस्थः पावको मध्यो भिन्नाचारोऽधमो मतः ॥
उत्तमैर्ब्राह्मणः स्पृष्ट उपस्पृश्य द्विजः शुचिः ।
अधमः सूर्य्यगामग्निं स्पृष्टः शुध्यति ब्राह्मणः ॥"
इति मत्स्यसूक्ते ३९ पटलः ॥

स्पृष्टास्पृष्टि, व्य, (स्पृष्टेन स्पृष्टेन यत् भवति । "इच् कर्म्मव्यतिहारे ।" ५ । ४ । १२७ । इति इच् । "अन्येषामपि दृश्यते ।" ६ । ४ । १३७ । इति दीर्घः ।) परस्परस्पर्शनम् । छोयाछुँयि इति भाषा । यथा, रत्नाकरे बृहस्पतिः ।
"तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे ।
नगरग्रामदाहे च स्पृष्टास्पृष्टि न दुष्यति ॥
आपद्यपि च कष्टायां रुग्भये पीड़िते तथा ।
मातामित्रोर्गुरोश्चैव निदेशे वर्त्तनात्तथा ॥"
स्पृष्टास्पृष्टि इत्यव्ययं क्रियाव्यतीहारे । तथेति न दुष्यतीत्यर्थः । इति प्रायश्चित्ततत्त्वम् ॥ मत्स्यसूक्ते ३८ पटलेऽप्यन्यत् द्रष्टव्यम् ॥

स्पृष्टिः, स्त्री, (स्पृश + क्तिन् ।) स्पर्शः । तत्पर्य्यायः । पृक्तिः २ । इत्यमरः । ३ । २ । ९ ॥ स्पर्शनम् ३ । इति शब्दरत्नावली ॥

स्पृह, त् क ईप्से । इति कविकल्पद्रुमः ॥ (अदन्त चुरा०-पर०-सक०-सेट् ।) ईप्स आप्तुमिच्छा । स्पृहयति । इति दुर्गादासः ।

स्पृहणीयं, त्रि, (स्पृह + अनीयर् ।) वाञ्छनीयम् । यथा, ऋतुसंहारे । १ । १ ।
"प्रचण्डसूर्य्यः स्पृहणीयचन्द्रमाः
सदावगाहक्षतवारिसञ्चयः ।
दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालः समुपागतः प्रिये ॥"

स्पृहयालुः, त्रि, (स्पृहयति तच्छीलः । स्पृह + "स्पृहिगृहिपतीति । ३ । २ । १५८ । इति आलुच् ।) स्पृहाशीलः । लोभी । इति मुग्धबोधव्याकरणम् ॥ (यथा, रघुः । १४ । ४५ ।
"प्रजावती दोहदशंसिनी ते
तपोवनेषु स्पृहयालुरेव ॥")

स्पृहा, स्त्री, (स्पृह + अङ् । टाप् ।) इच्छा । इत्यमरः । १ । ७।२७ ॥ तस्याः निन्दाप्रशंसे यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ।३५।७३—७५ ; ८४—८५ ।
"तपो धनं ब्राह्मणानां तपः कल्पतरुस्तथा ।
तपस्या कामधेनुश्च सन्ततं तपसि स्पृहा ॥
ऐश्वर्य्ये क्षत्रियाणाञ्च वाणिज्ये च तथा विशाम् ।
शूद्राणां विप्रसेवायां स्पृहा वेदेष्वनिन्दिता ॥
क्षत्रियाणाञ्च तपसि स्पृहातीवप्रशंसिता ।
ब्राह्मणानां विवादेषु स्पृहातीव विनिन्दिता ॥
क्षत्रियाणां रणे धर्म्मो रणे मृत्युर्न गर्हितः ।
रणे स्पृहा ब्राह्मणानां लोके वेदे विड़म्बना ॥
तपोधनानां विप्राणां वाग्बलानां युगे युगे ।
शान्तिस्वस्त्ययनं कर्म्म विप्रधर्म्मो न सङ्गरः ॥"

स्पृह्यः, पुं, (स्पृह्यते इति । स्पृह + यत् ।) मातुलुङ्गः । इति शब्दचन्द्रिका ॥ वाञ्छनीये, त्रि ॥

स्प्रष्टा, [ऋ] त्रि, (स्पृशतीति । स्पृश + तृच् ।) उपतापकभावम् । इत्यमरः । ३ । २ । १४ ॥ रोगः । इत्येके । इति भरतः ॥ (स्पर्शकः । यथा, महाभारते । १४ । २० । २१ ।
"घ्राता भक्षयिता द्रष्टा स्प्रष्टा श्रोता च पञ्चमः ।
मन्ता बोद्धा च सप्तैते भवन्ति परमर्त्विजः ॥")

स्फट इ } शीर्णौ । इति कविकल्पद्रुमः ॥ (भ्वा०-
स्फट } पर०-अक०-सेट् ।) द्वावाद्यस्वरिणावोष्ठ्यवर्गद्वितीययुक्तौ । पञ्चमस्वरिणाविति भ्रमो हेयः । तथात्वे सजातीयतया स्फुटक् भिदीत्यादीनां सन्निधावेवापठिष्यत् । एवं संख्यापि न संगच्छते । स्फुटिर्विशरणे इत्यनेनैवेष्टसिद्धे शेषधातोश्च वैयर्थ्यं स्यात् । अतएव रमानाथोऽपि स्फुटिर्विशरणे इत्यत्र उकारशून्यः स्फट इति केचित् पठन्ति । पचादित्वादनि स्फटा फणा इति सुभूतिरित्यन्तमाह । इ, स्फण्टते । स्फटति गात्रे व्रणः । पस्फट पस्फाट स्फटिकम् । इति दुर्गादासः ॥

स्फटः, पुं, (स्फटतीति । स्फट + अच् ।) फणा । इत्यमरः । १ । ८ । ९ ॥

स्फटा, स्त्री, (स्फट + अच् । टाप् ।) फणा । इत्यमरः । १ । ८ । ९ ॥

स्फटिकः, पुं, (स्फट शीर्णौ + बाहुलकात् इकन् ।) सूर्य्यकान्तमणिः । इति हलायुधः ॥ स्वनामख्यातमणिः । फटिक् इति भाषा । तत्पर्य्यायः । स्फाटिकम् २ स्फाटकम् ३ । इति शब्दरत्नावली ॥ भासुरः ४ स्फाटिकोपलः ५ शालिपिष्टम् ६ धौतशिलम् ७ । इति त्रिकाण्डशेषः ॥ सितोपलः ८ विमलमणिः ९ निर्म्मलोपलः १० स्वच्छः ११ स्वच्छमणिः १२ अमररत्नम् १३ निस्तुषरत्नम् १४ शिवप्रियः १५ । अस्य गुणादि यथा,—
"स्फटिकः समवीर्य्यश्च पित्तदाहार्त्तिदोषनुत् ।
तस्याक्षमालां जपता दत्ते कोटिगुणं फलम् ॥"
तत्परीक्षा यथा,—
"यद्गङ्गातोयबिन्दुच्छविविमलतमं निस्तुषं नेत्रहृद्यं
स्निग्धं शुद्धान्तरालं मधुरमतिहिमं पित्तदाहास्रहारि ।
पाषाणे यन्निघृष्टं स्फुटितमपि निजां स्वच्छतां नैव जह्यात्
तज्जात्यं जातु लभ्यं शुभमुपचिनुते शैवरत्नञ्च रत्नम् ॥"
बिन्दुस्थाने विश्रुदिति च पाठः । इति राजनिर्घण्टः ॥ अपि च ।
"मुक्ताविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादिकम् ।
मणिरत्नं सरं शीतं कषायं स्वादुलेखनम् ।
चक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम् ॥"
इति राजवल्लभः ॥ ३ ॥
तस्य उत्पत्तिपरीक्षे यथा,—
"कावेरविन्ध्ययवनचीननेपालभूमिषु ।
लाङ्गली व्यकिरन्मेदो दानवस्य प्रयत्नतः ॥